श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ अष्टमस्कन्धे पञ्चदशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ अष्टमस्कन्धे पञ्चदशोऽध्यायः ॥

राजोवाच
बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत।
भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध तम् ॥ 1 ॥

एतद् वेदितुमिच्छामो महत् कौतूहलं हि नः।
यज्ञेश्वरस्य पूर्णस्य बन्धनं चाप्यनागसः ॥ 2 ॥

श्रीशुक उवाच
पराजितश्रीरसुभिश्च हापितो
    हीन्द्रेण राजन् भृगुभिः स जीवितः।
सर्वात्मना तानभजद् भृगून् बलिः
    शिष्यो महात्मार्थनिवेदनेन ॥ 3 ॥

तं ब्राह्मणा भृगवः प्रीयमाणा
    अयाजयन् विश्वजिता त्रिणाकम्।
जिगीषमाणं विधिनाभिषिच्य
    महाभिषेकेण महानुभावाः ॥ 4 ॥

ततो रथः काञ्चनपट्टनद्धो
    हयाश्च हर्यश्वतुरङ्गवर्णाः।

ध्वजश्च सिंहेन विराजमानो
    हुताशनादास हविर्भिरिष्टात् ॥ 5 ॥

धनुश्च दिव्यं पुरटोपनद्धं
    तूणावरिक्तौ कवचं च दिव्यम् ।
पितामहस्तस्य ददौ च माला -
    मम्लानपुष्पां जलजं च शुक्रः ॥ 6 ॥

एवं स विप्रार्जितयोधनार्थः
    तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ।
प्रदक्षिणीकृत्य कृतप्रणामः
    प्रह्लादमामन्त्र्य नमश्चकार ॥ 7 ॥

अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ।
सुस्रग्धरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥ 8 ॥

हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः ।
रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥ 9 ॥

तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः ।
पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥ 10 ॥

वृतो विकर्षन् महतीमासुरीं ध्वजिनीं विभुः ।
ययाविन्द्रपुरीं स्वृद्धां कम्पयन्निव रोदसी ॥ 11 ॥

रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः ।
कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ 12 ॥

प्रवालफलपुष्पोरुभारशाखामरद्रुमैः।
हंससारसचक्राह्वकारण्डवकुलाकुलाः।
नलिन्यो यत्र क्रीडन्ति प्रमदाः सुरसेविताः॥ **13** ॥

आकाशगङ्गया देव्या वृतां परिखभूतया।
प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च॥ **14** ॥

रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः।
जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम्॥ **15** ॥

सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्वृताम्।
शृङ्गाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः॥ **16** ॥

यत्र नित्यवयोरूपाः श्यामा विरजवाससः।
भ्राजन्ते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः॥ **17** ॥

सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजाम्।
यत्रामोदमुपादाय मार्ग आवाति मारुतः॥ **18** ॥

हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना।
पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरप्रियाः॥ **19** ॥

मुक्तावितानैर्मणिहेमकेतुभि -
　　र्नानापताकावलभीभिरावृताम्।
शिखण्डिपारावतभृङ्गनादितां
　　वैमानिकस्त्रीकलगीतमङ्गलाम्॥ **20** ॥

मृदङ्गशङ्खानकदुन्दुभिस्वनैः
　　सतालवीणामुरजर्ष्टिवेणुभिः।

नृत्यैः सवाद्यैरुपदेवगीतकै -
    र्मनोरमां स्वप्रभया जितप्रभाम् ॥ **21** ॥

यां न व्रजन्त्यधर्मिष्ठाः खला भूतद्रुहः शठाः।
मानिनः कामिनो लुब्धा एभिर्हीना व्रजन्ति यत् ॥ **22** ॥

तां देवधानीं स वरूथिनीपति -
    र्बहिः समन्ताद् रुरुधे पृतन्यया।
आचार्यदत्तं जलजं महास्वनं
    दध्मौ प्रयुञ्जन् भयमिन्द्रयोषिताम् ॥ **23** ॥

मघवांस्तमभिप्रेत्य बलेः परममुद्यमम्।
सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ **24** ॥

भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः।
अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ॥ **25** ॥

नैनं कश्चित् कुतो वापि प्रतिव्योढुमधीश्वरः।
पिबन्निव मुखेनेदं लिहन्निव दिशो दश।
दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥ **26** ॥

ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः।
ओजः सहो बलं तेजो यत एतत्समुद्यमः ॥ **27** ॥

गुरुरुवाच
जानामि मघवञ्छत्रोरुन्नतेरस्य कारणम्।
शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥ **28** ॥

भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिम्
    नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः ॥ **29** ॥

तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम्।
यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः॥ **30** ॥

एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः।
तेषामेवापमानेन सानुबन्धो विनङ्क्ष्यति॥ **31** ॥

एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना।
हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः॥ **32** ॥

देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम्।
देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम्॥ **33** ॥

तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः।
शतेन हयमेधानामनुव्रतमयाजयन्॥ **34** ॥

ततस्तदनुभावेन भुवनत्रयविश्रुताम्।
कीर्तिं दिक्षु वितन्वानः स रेज उडुराडिव॥ **35** ॥

बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम्।
कृतकृत्यमिवात्मानं मन्यमानो महामनाः॥ **36** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
अष्टमस्कन्धे पञ्चदशोऽध्यायः॥